# ॥ श्रीशैलभ्रमराम्बिकाष्टकम् ॥

श्रीकान्तस्तुतसद्गुणाञ्चितपदां सिद्धर्षिसंसेविताम्
बालेन्दुद्युतिपादपल्लवयुतां ब्रह्माण्डसञ्चारिणीम् ।
चारुश्रीकलशातपत्रकमहासौभाग्यरेखांघ्रिकाम्
श्रीशैलभ्रमराम्बिकां शिवयुतां चिन्मात्रमूर्तिं भजे ॥१ ॥

पादाम्भोरुहमथ्यमानमहिषां भद्रायमानोदयाम्
कूर्माकारपदोपरिस्थलरुचिं घोरान्धकारापहाम् ।
जंघानिर्मितमान्मथेयशरधिं जम्बूफलश्रीमयीम्
श्रीशैलभ्रमराम्बिकां शिवयुतां चिन्मात्रमूर्तिं भजे ॥२ ॥

जानुश्रीजितकुम्भिकुम्भविभवां चण्डीं महायोगिनीम्
रम्भारम्भकराधरोरुयुगलां रत्नासनस्थायिनीम् ।
श्रीचक्राङ्कितचक्रविभ्रमकटिं सिन्दूरवर्णोज्ज्वलाम्
श्रीशैलभ्रमराम्बिकां शिवयुतां चिन्मात्रमूर्तिं भजे ॥३ ॥

भर्मानिर्मितदिव्यरत्नदलनां भव्याम्बरालङ्कृताम्
सौन्दर्योदकपूर्णनाभिसरसीं शान्तोल्लसन्मध्यगाम् ।

वक्षोजद्वयशातकुम्भकलशां वश्यादिमन्त्रात्मिकाम्
श्रीशैलभ्रमराम्बिकां शिवयुतां चिन्मात्रमूर्तिं भजे ॥४ ॥

कण्ठालम्बिततारहारपटलां कैवल्यसन्दायिनीम्
शोभाजालमृणालबाहुडमरुस्थूलाब्जचक्राङ्किताम् ।
सद्बिम्बाधररक्तकुन्दवदनां सारस्यसम्भाषिणीम्
श्रीशैलभ्रमराम्बिकां शिवयुतां चिन्मात्रमूर्तिं भजे ॥५ ॥

नक्षत्राधिकनासिकामणिधरां नव्यारविन्देक्षणाम्
मुक्तालङ्कृतकर्णभूषणयुगां मुग्धप्रतापोन्नताम् ।
आदर्शामलगण्डमण्डलधरामानन्दपूर्णान्तराम्
श्रीशैलभ्रमराम्बिकां शिवयुतां चिन्मात्रमूर्तिं भजे ॥६ ॥

श्रीबालां च सुगन्धिगन्धतिलकां नव्यद्विरेफालकाम्
सीमन्तायतनद्धमौक्तिकसरां शृङ्गाररङ्गत्कचाम् ।
गाङ्गेयाञ्चितरत्नकङ्कणझणत्काराग्रहस्तद्वयाम्
श्रीशैलभ्रमराम्बिकां शिवयुतां चिन्मात्रमूर्तिं भजे ॥७ ॥

सर्वाङ्गाभरणां प्रसन्नवदनां सर्वेश्वरीं सर्वदाम्

सर्वज्ञां सजलाभ्रविभ्रमतनुं भक्तप्रियामम्बिकाम् ।
मौलिस्थापितचन्द्रशेखरवरां माल्यार्चिताङ्गां शिवाम्
श्रीशैलभ्रमराम्बिकां शिवयुतां चिन्मात्रमूर्तिं भजे ॥८ ॥

कल्याणीं कमलासनस्थचरणां गौरीं घनश्यामलाम्
ग्रैवेयाकृतिहारनूपुरधरां कञ्जातपत्रेक्षणाम् ।
गङ्गातुङ्गतरङ्गभासवदनां गन्धर्वगानप्रियाम्
श्रीशैलभ्रमराम्बिकां शिवयुतां चिन्मात्रमूर्तिं भजे ॥९ ॥

श्रीशैलभ्रमराम्बिकाष्टकमिदं श्रेयस्करं शाश्वतम्
चैन्द्रश्रीकरमप्रमेयमतुलं हर्षप्रदं बुद्धिदम्
प्राभाते नियमात् पठेद्यदि पुमान् भक्त्यन्तरात्मा शुचिः
शौक्लीं कान्तिमवाप्नुयात् त्रिजगतां सर्वेश्वरत्वं जयम् ॥१० ॥

Sri Kamakoti Mandali [srigurupaduka@yahoo.com]